वेदवेदाङ्गविदुषः सत्यधर्म्मरतस्य ते ।
ब्राह्मणस्य विशेषेण तवैतन्नोपपद्यते ॥
न्यस्यायुधममोघेषो ! तिष्ठ वर्त्मनि शाश्वते ।
परिपूर्णश्च कालस्ते वस्तुं लोके ह्यमानुषे ॥
ब्रह्मास्त्रेण त्वया दग्धा अनस्त्रज्ञा नरा युधि ।
यदेतदीदृशं विप्र ! कृतं कर्म्म न साधु तत् ॥
न्यस्यायुधं रणे क्षिप्रं द्रोण ! मा त्वं चिरं कृथाः ।
मा पापिष्ठतरं कर्म्म करिष्यसि पुनर्द्विज ! ॥”
अयं हि जमदग्निप्रभृतिभिरुक्तो न्यस्तशस्त्रश्च द्रुपदपुत्त्रेण धृष्टद्युम्नेन निहतः । यथा, तत्रैव । ७ । १९० । २२—४० ।
“तस्य तच्छिद्रमाज्ञाय धृष्टद्युम्नः प्रतापवान् ।
सशरं तद्धनुर्घोरं संन्यस्याथ रथे ततः ।
खड्गी रथादवप्लुत्य सहसा द्रोणमभ्ययात् ॥
हाहाकृतानि भूतानि मानुषानीतराणि च ।
द्रोणं तथागतं दृष्ट्वा धृष्टद्युम्नवशं गतम् ॥
हाहाकारं भृशञ्चक्रुरहो धिगिति चाब्रुवन् ।
द्रोणोऽपि शस्त्राण्युत्सृज्य परमं साम्यमास्थितः ॥
तथोक्त्वा योगमास्थाय ज्योतिर्भूतो महातपाः ।
पुराणं पुरुषं विष्णुं जगाम मनसा परम् ॥
मुखं किञ्चित् समुन्नाम्य विष्टभ्य उरमग्रतः ।
निमीलिताक्षः सत्त्वस्थो निक्षिप्य हृदि धारणाम् ॥
ओम् इत्येकाक्षरं ब्रह्म ज्योतिर्भूतो महातपाः ।
स्मरित्वा देवदेवेशमक्षरं परमं विभुम् ॥
दिवमाक्रामदाचार्य्यः सद्भिः सह दुराक्रमम् ।
द्वौ सूर्य्याविव नो बुद्धिरासीत्तस्मिंस्तथागते ॥
एकाग्रमिव चासीच्च ज्योतिर्भिः पूरितं नभः ।
समपद्यदथार्काभे द्रोणस्य निधने तथा ॥
निमेषमात्रेण च तज्ज्योतिरन्तरधीयत ।
आसीत् किलकिलाशब्दः प्रहृष्टानां दिवौकसाम् ।
ब्रह्मलोकं गते द्रोणे धृष्टद्युम्ने च मोहिते ॥
वयमेव तदाद्राक्ष्म पञ्च मानुषयोनयः ।
योगयुक्तं महात्मानं गच्छन्तं परमां गतिम् ॥
अहं धनञ्जयः पार्थः कृपः शारद्वतस्तथा ।
वासुदेवश्च वार्ष्णेयो धर्म्मपुत्त्रश्च पाण्डवः ॥
अन्ये तु सर्व्वे नापश्यन् भारद्वाजस्य धीमतः ।
महिमानं महाराज ! योगयुक्तस्य गच्छतः ॥
ब्रह्मलोकं महद्दिव्यं देवगुह्यं हि तत्परम् ।
गतिं परमिकां प्राप्तमजानन्तो नृयोनयः ।
नापश्यन् गच्छमानं हि तं सार्द्धमृषिपुङ्गवैः ।
आचार्य्यं योगमास्थाय ब्रह्मलोकमरिन्दमम् ॥
वितुन्नाङ्गं शरव्रातैर्न्यस्तायुधमसृक्क्षरम् ।
धिक्कृतः पार्षतस्तन्तु सर्व्वभूतैः परामृशत् ॥
तस्य मूर्द्धानमालम्ब्य गतसत्त्वस्य देहिनः ।
किञ्चिदब्रुवतः कायाद्विचकर्त्तासिना शिरः ॥”
“क्रोशमानेऽर्ज्जुने चैव पार्थिवेषु च सर्व्वशः ।
धृष्टद्युम्नोऽवधीद्द्रोणं रथतल्पे नरर्षभम् ॥
शोणितेन परिक्लिन्नो रथाद्भूमिमरिन्दमः ।
लोहिताङ्ग इवादित्यो दुर्द्दर्शः समपद्यत ॥”*॥)
दग्धकाकः । इति मेदिनी । णे, १७ ॥ (यदुक्तम् ।
“के शवं ॰ तितं दृष्ट्वा द्रोणो हर्षमुपागतः ।
रुदन्ति पाण्डवाः सर्व्वे हाहा के शव के शव ॥”)
वृश्चिकः । इति राजनिर्घण्टः ॥ चतुःशतधनुःपरिमितजलाशयः । यथा, शतेन धनुर्भिः पुष्करिणी । त्रिभिः शतैर्दीर्घिका । चतुर्भिर्द्रोणः । पञ्चभिस्तड़ागः । द्रोणाद्दशगुणा वापी । इति जलाशयतत्त्वम् ॥ मेघनायकः । यथा,—
“त्रियुते शाकवर्षे तु चतुर्भिः शेषितः क्रमात् ।
आवर्त्तं विद्धि सम्वर्त्तं पुष्करं द्रोणमम्बुदम् ॥
आवर्त्तो निर्ज्जलो मेघः सम्वर्त्तश्च बहूदकः ।
पुष्करो दुष्करजलो द्रोणः शस्यप्रपूरकः ॥”
इति ज्योतिस्तत्त्वम् ॥
श्वेतवर्णक्षुद्रपुष्पवृक्षविशेषः । घलघसिया इति हलकसिया इति च भाषा ॥ यथा,—
“ब्रह्मविष्णुशिवादीनां द्रोणपुष्पं सदा प्रियम् ।
तत्ते दुर्गे ! प्रयच्छामि पवित्रन्ते सुरेश्वरि ! ॥”
इति स्मार्त्तकृतदुर्गार्च्चाप्रयोगः ॥
(शाकद्वीपान्तर्गतपर्व्वतविशेषः । यथा, मात्स्ये । १२१ । ५६ ।
“चतुर्थः पर्व्वतो द्रोणो यत्रौषध्यो महागिरौ ।
विशल्यकरणी चैव मृतसञ्जीवनी तथा ॥”
वसुपुत्त्रविशेषः । यथा भागवते । ६ । ६ । ११ ।
“वसवोऽष्टौ वसोः पुत्त्रास्तेषां नामानि मे शृणु ।
द्रोणः प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वास्तुर्विभावसुः ॥”)

द्रोणकाकः, पुं, (द्रोण एव काकः ।) वनकाकः । दाँड़काक इति भाषा । तत्पर्य्यायः । काकोलः २ । इत्यमरः । २ । ५ । २१ ॥ द्रोणः ३ अरण्यवायसः ४ वनवासी ५ महाप्राणः ६ क्रूररावी ७ पलप्रियः ८ । इति राजनिर्घण्टः ॥ काकलः ९ । इति शब्दरत्नावली ॥

द्रोणगन्धिका, स्त्री, (द्रोणस्य द्रोणपुष्पस्य गन्ध इव गन्धो यस्याः । कप् । टापि अत इत्वम् ।) रास्ना । इति जटाधरः ॥

द्रोणघा, स्त्री, (द्रोणदुघा । पृषोदरादित्वात् दुलोपः ।) द्रोणदुघा । इति शब्दचन्द्रिका ॥

द्रोणदुग्धा, स्त्री, (द्रोणपरिमितं दुग्धं यस्याः ।) द्रोणक्षीरा । इति हेमचन्द्रः । ४ । ३३५ ॥

द्रोणदुघा, स्त्री, (द्रोणं दोग्धीति । दुह + “दुहः कप् घश्च ।” ३।२।७० । इति कप् घश्चान्तादेशः ।) द्रोणपरिमितदुग्धदात्री गवी । तत्पर्य्यायः । द्रोणक्षीरा २ । इत्यमरः । २।९ । ७२ ॥ द्रोणमाना ३ द्रोणघा ४ पयस्विनी ५ । इति शब्दचन्द्रिका ॥ द्रोणदुग्धा ६ । इति हेमचन्द्रः । ४ । ३३५ ॥ द्रोणमानपयस्विनी ७ । इति शब्दरत्नावली ॥

द्रोणपुष्पी, स्त्री, (द्रोणवत् पुष्पं यस्याः ङीष् ।) क्षुद्रक्षुपविशेषः । गूमा इति ख्याता । तत्पर्य्यायः । खर्व्वपत्त्रा २ कुम्भयोनिः ३ कुरुम्बिका ४ चित्राक्षुपः ५ कुरुम्बा ६ सुपुष्पा ७ चित्रपत्रिका ८ । इति राजनिर्घण्टः ॥ द्रोणा ९ फलेपुष्पा १० । इति भावप्रकाशः ॥ अस्या गुणाः । कटुत्वम् । उष्णत्वम् । रुच्यत्वम् । वातकफाग्निमान्द्यपक्ष- ॰तनाशित्वञ्च । इति राजनिर्घण्टः ॥ गुरुत्वम् । स्वादुत्वम् । रूक्षत्वम् । वातपित्तकारित्वम् । सक्षारलवणत्वम् । स्वादुपाकित्वम् । भेदकत्वम् । आमकामलाशोथतमकश्वासजन्तुनाशित्वञ्च । इति भावप्रकाशः ॥ गोशीर्षकवृक्षः । इति रत्नमाला ॥ घलघसिया इति भाषा । अस्य गुणः । कफार्शःकामलाक्रिमिशोथनाशित्वम् । इति राजवल्लभः ॥

द्रोणमाना, स्त्री, (द्रोणो मानं दुग्धस्य यस्याः ।) द्रोणदुघा । इति शब्दचन्द्रिका ॥

द्रोणमुखं, क्ली, चतुःशतग्राममध्ये मनोहरग्रामः । इति हारावली । १२० ॥

द्रोणम्पचः, त्रि, (द्रोणं द्रोणपरिमितं पचतीति । द्रोण + पच + “परिमाणे पचः ।” ३ । २ । ३३ । इति खश् ।) द्रोणपरिमितवस्तुपाककर्त्ता । इति मुग्धबोधव्याकरणम् ॥

द्रोणा, स्त्री, (द्रोण + टाप् ।) द्रोणपुष्पी । इति भावप्रकाशः ॥

द्रोणाचार्य्यः, पुं, (द्रोण एव आचार्य्यः ।) भरद्वाजपुत्त्रः । सः अश्वत्थामपिता कृपीपतिः । पाण्डवानामस्त्रशिक्षागुरुश्च । तत्पर्य्यायः । द्रोणः २ गुरुः ३ आचार्य्यः ४ कौर्म्मिभाक् ५ भारद्वाजः ६ कुम्भयोनिः ७ द्रोणाचार्य्यकः ८ । इति शब्दरत्नावली ॥ (विशेषविवरणमस्य द्रोणशब्दे द्रष्टव्यम् ॥)

द्रोणिः, स्त्री, (द्रवतीति । द्रु गतौ + “वहिश्रिश्रुयुद्रुग्लेति ।” उणां ४।५१ । इति निः स च नित् ।) द्रोणी । इत्यमरटीकायां भरतः ॥ (पुं, अश्वत्थामा । स तु अष्टममन्वन्तरगतानां ऋषीणामन्यतमः । यथा, मार्कण्डेये । ८० । ४ ।
“ऋष्यशृङ्गस्तथा द्रोणिस्तत्र सप्तर्षयोऽभवन् ॥”)

द्रोणिका, स्त्री, (द्रोणिरिव कायति प्रकाशते इति । कै + क + टाप् ।) नीलीवृक्षः । इति शब्दरत्नावली ॥

द्रोणी, स्त्री, (द्रोणि + कृदिकारादिति वा ङीष् ।) देशविशेषः । काष्ठाम्बुवाहिनी । गवादनी । इति मेदिनी । णे, १७ ॥ (कलशाकारपात्रविशेषः । यथा, महाभारते । १ । ६३ । १०३ ।
“भरद्वाजस्य च स्कन्नं द्रोण्यां शुक्रमवर्द्धत ॥”)
नीलीवृक्षः । इति शब्दरत्नावली ॥ शैलभेदः । शैलयोः सन्धिः । इति हेमचन्द्रः । ४ । १०० ॥ इन्द्रचिर्भिटी । द्रोणीलवणम् । इति राजनिर्घण्टः ॥ नदीविशेषः ॥ इत्युणादिकोषः ॥ द्विशूर्पपरिमाणम् । १२८ शेर इति भाषा । तत्पर्य्यायः । वाहः २ गोणी ३ । इति वैद्यकपरिभाषा ॥

द्रोणीदलः, पुं, (द्रोण्या इव दलं यस्य ।) केतकीपुष्पः । इति हारावली । ९२ ॥

द्रोणीमुखं, क्ली, (द्रोणीव मुखं यस्य ।) द्रोणमुखम् । इति भूरिप्रयोगः ॥

द्रोणीलवणं, क्ली, (द्रोणीसम्भूतं लवणम् ।) उपकर्णाटदेशप्रसिद्धलवणविशेषः । तत्पर्य्यायः । द्रोणेयम् २ वार्द्धेयम् ३ द्रोणीजम् ४ वारिजम्